Naveen Shodh Sansar (An International Refereed / Peer Review Multidisciplinary Research Journal)
RNI No.- MPHIN/2013/60638, ISSN 2320-8767, E- ISSN 2394-3793, Scientific Journal Impact Factor (SJIF)- 8.054,
July to September 2025, E-Journal, Vol. I, Issue LI (51), ISO 9001:2015 - E2024049304 (QMS)

# महाकविहर्षवर्धनस्य रूपकेषु ललितकला

**वासुदेव एक्का*   डॉ. बहुरन सिंह पटेल****

* शोधच्छात्र:, शासकीय दू.श्री वै. संस्कृत महाविद्यालय:, रायपुरम् (छ.ग.) भारत
** सहायक प्राध्यापक: (व्याकरणम्) शासकीय दू.श्री वै.संस्कृत महाविद्यालय:, रायपुरम् (छ.ग.) भारत

**शोधसार:–** हर्षवर्धनस्य रूपकेषु संस्कृतसाहित्यस्य ललितकलानां प्रमुखं स्थानमस्ति। हर्षवर्धन: सप्तमशताब्द्या: प्रख्यात: सम्राट: विद्वान: चासीत्। तस्य आश्रये बाणभट्ट: मयूर: मतङ्ग: च इत्यादय: कवय: आसन्। हर्षवर्धनस्य रचनायां नागानन्दनाटकं एकं प्रसिद्धं संस्कृतनाटकमस्ति। य: बौद्धधर्मस्य प्रभावं दर्शयति। ललितकला: यथा सङ्गीतं, नृत्यं, चित्रं, वाद्ययन्त्रं च नागानन्दनाटके प्रदर्शनस्य अङ्गानि वर्तन्ते। गीतानां रागात्मकं चित्रणं दर्शकानां हृदये आह्लादयति। ललितकला जीवनस्याधारोऽस्ति। ललितकलाया: जीवनस्य च महत्तवपूर्ण: सम्बन्धोऽस्ति। कला जीवनस्य लालित्यं जनयति। अत: नीतिशतकम् इति स्वग्रन्थे भर्तृहरि: कलाविहीन: मनुष्यं पशुतुल्यं कथयति –
**'साहित्यसङ्गीतकलाविहीन: साक्षात् पशु: पुच्छविषाणहीन:।'( नीतिशतकम्–13 )**
**कूटशब्द: –** सङ्गीतं, नृत्यं, चित्रं, वाद्ययन्त्रं च इत्यादय:।

**प्रस्तावना –** हर्षवर्धन: भारतीय इतिहासे सम्राटस्य रूपे सुप्रसिद्धोऽस्ति। तस्य जन्म ज्येष्ठकृष्णद्वादशी दिनाङ्के 595 ईसवीं अभवत्। बाणभट्टस्य 'हर्षचरितम्' ह्वेनसाङ्गस्य च यात्रावृत्तान्तात् वयं स्पष्टतया जानीम: यत् हर्षवर्धन: 'हूण–हरिण–केसरी' प्रभाकरवर्धनयशोमत्यो: पुत्र: आसीत्। स: स्वपितु: द्वितीय: पुत्र: आसीत्। तस्य अग्रजस्य भ्राता राज्यवर्धन: आसीत्। तस्या: भगिनी राज्यश्री योग्या विदुषी आसीत्। तस्य बाल्यकाले सम्यक् शिक्षां दत्तम्। पिता हर्षवर्धनं राज्यवर्धनेन सह पञ्जाबदेशे निवसतां हुणानां पराजयार्थं प्रेषितवान्। दुर्दैववशाद्राज्यवर्धन: शशाङकनामकेन वङ्गीयनृपतिना छलेन निहत:। तदन्तरं हर्षवर्धनो राजा बभूव। अस्य राजधानी स्थाण्वीश्वरनामकं स्थानमासीत्। अस्य राज्यकाल: 606–647 खीष्टाब्दमासीदिति प्रतीतम्।

हर्षवर्धनस्य रूपकत्रयं सन्ति –1. रत्नावली, 2. प्रियदर्शिका, 3. नागानन्दञ्च।

नागानन्दनाटके जीमूतवाहनस्य यशो गीतम्। बौद्धहिन्दुधर्म–योरतिमधुरा संसृष्टिरस्ति। प्रियदर्शिका, रत्नावली च नाटिकयो: उदयस्य प्रियदर्शिकाया: रत्नावल्या: च अनुरागस्य कथा वर्णिता अस्ति। नागानन्दनाटके पञ्चाङ्का: सन्ति। यस्मिन् विद्याधर जीमूतवाहनस्य आत्मत्यागस्य कथां वर्णितास्ति। नाट्यदृष्ट्या हर्षवर्धनस्य रूपकेषु नाट्यशास्त्रीय पद्धतिं अभिनयस्य च गुणान् अनुसरन्ति। काव्यत्वस्य च दृष्ट्यापि उत्तमा: सन्ति। हर्षवर्धनस्य रूपकेषु विविधानि चित्रणानि उपलभ्यन्ते। अन्त:पुरस्य विलासपूर्णघटनानां, नागरिकानां उत्सवानां, देवपूजानां, प्रकृते: रमणीयताया:, स्त्रीणां सौन्दर्यस्य, प्रणयभावनानां, नृत्य–सङ्गीतस्य च वर्णनं वर्तते।

कविहर्षवर्धन: राजकार्येषु व्यस्त: सन् अपि स्वरचनासु सङ्गीतस्य चित्रकलाया: च समुचितप्रयोगं कृतवान्। हर्षवर्धनं सङ्गीतस्य चित्रकलाया: चापि ज्ञानमासीत् इति तस्य कृतीभ्य: स्पष्टं भवति। हर्षवर्धनस्य वीणाया: नाम घोषवती आसीत्। एतां वीणां वादन् गजान् वशयति स्म।

**महाकविहर्षवर्धनस्य रूपकेषु ललितकला: –** नागानन्दनाटके ललितकलया पूर्णमस्ति। अनेकेषु स्थानेषु ललिताकलाया: विषये उल्लेखा: प्राप्यन्ते –

1. **सङ्गीतकला –** नागानन्दनाटकस्य आरम्भेऽपि सङ्गीतकलाया: विषये अकथयत् –

**'अहं गृहं गत्वा गृहिणीमाहूय सङ्गीतकमनुतिष्ठामि।'**

इत्थं प्रथमोङ्कस्य नवमे श्लोके सङ्गीतस्य विस्तरेण चर्चा कृतामस्ति –

**'क्रन्दत्कन्दरगह्वरो जलनिधेरास्फालितो वीचभि:'।**

समुद्रस्य तरङ्गानां पर्वतगुहाप्रहारै: या ध्वनि: उत्पन्न: अत्यन्तं मनोहर: भवति। तस्या: ध्वन्या: माधुर्यगुण: मन्त्रमुग्धं भवति। नायक: विदूषक: च तस्मिन् स्थाने स्थातुं वार्ता कथयत:। सङ्गीतं मनुष्याणां श्रोत्रिन्द्रियाणां माध्यमेन अन्त:करणं प्रभावितं करोति। न केवलं मनुष्यान् अपितु प्रत्येक जीवं आनन्दं ददाति।

**'स्थानप्राप्त्य दधानं प्रकटितगमकां मन्द्रतारव्यस्थां**
**विह्नरादिन्या विपंच्या मिलितमलिरूतेनेव तन्त्रीसवरेण।**
**एते दन्तान्तरालस्थित तृणकवलच्छेदशब्दं नियम्य**
**व्याजिह्मांगा: कुरंगा: स्फुटललितपदं गीतमाकर्णयन्ति॥'**

मृग: वलितग्रीवा कृत्वा तृणचर्वणं च त्यक्त्वा सुमधुरगीतस्य प्राप्नोति। तस्मिन् सङ्गीते उच्चारित: शब्द: मन्त्रमुग्धं करोति। अस्मिन् तारस्वाराणां प्रस्तुता: सन्ति। अनेन आनन्दस्य प्रतीतं भवति। कर्णप्रियसङ्गीत मन: आह्लादयति पशव: अपि तस्यै श्रोतुं रोचन्ते। सुधयापीडित: हिरण: तृणं त्यक्त्वा सङ्गीतस्य आनन्दं नयति। सङ्गीतं न् केवलं तदेव यत् वाद्ययन्त्रै: उत्पाद्यते। कविना सङ्गीतरूपे अत्र भ्रमरझङ्कारं प्रस्तुतमस्ति।

**'मधुरमिव वदन्ति स्वागतं भृङ्गशब्दै:।'**

वर्तमानकालेऽपि अतिथीनां स्वागतं गायनेन करोति इति द्रष्टुं शक्यते

। स्वागतस्य विविधरूपेषु स्वागतगीतं श्रेष्ठं मन्यते। देवतानां आमन्त्रणेऽपि गीतगायनस्य प्रथा अस्ति। तथा च अत्र भ्रमरझङ्कारेण नायकस्य विदूषकस्य च कर्णप्रिय स्वागतं क्रियेते।

सङ्गीतद्धारा एव मलवतीं भगवतीं गौरी प्रसन्नं करोति। मलयवत्या: भगवत्या: गौर्या: आराधनायां गीतं गायति।

**उत्फुल्लकमलकेसरपरागगौरद्युते मम हि गौरी।**
**अभिवाञ्छितं प्रसिध्यतु भगवति युष्मत्प्रसादेन॥**

अर्थात् पुष्पितकमलस्य केसराणां परागस्य इव पीतवर्णेन कान्ति:। हे भगवति गौरी, त्वत्प्रसादेन मम कामना सिद्धा भवतु।

2. **वादनकला –** गौरीदेवी मन्दिरे वीणावादनस्य विधि: सर्वोत्तमा अस्ति। वीणावादनकौशले दशविधव्यञ्जनधातूनां प्रयोगा: प्रदर्शिता: सन्ति। व्यक्तिर्वयञ्जनधातुना दशविधेनाप्यत्र लब्धाऽमुना–

**विस्पष्टो द्रुतमध्यलम्बितपरिच्छिन्नस्त्रिधाऽयं लय:।**
**गोपुच्छाप्रमुखा: क्रमेण यतयस्त्रिस्रोऽपि सम्पादिता–**
**स्तत्त्वौधानुगताश्च वाद्यविधय: सम्यक् त्रयो दर्शिता:॥**

अस्मिन् गीते वीणावादनस्य दशकला: स्पष्टतया अभिव्यक्तं भवति। द्रुत:, मध्य:, विलम्बितश्च इति त्रिभि: प्रकारै: लया: विशेषरूपेण स्पष्ट: भवति। समा, स्त्रोतोवहा गोपुच्छा चेति एता: तिस्र: यतय: क्रमेण अभिव्यक्तं भवति। तत्त्वं, ओघं अनुगतं च त्रिवाद्यविधय: सम्यक् दर्शिता: सन्ति।

उपर्युक्तपद्ये सङ्गीतशास्त्रस्य वाद्ययन्त्राणि हर्षवर्धन: कलाशास्त्रे प्रवीणतां प्रदर्शितवान् अस्ति। सङ्गीतशास्त्रस्य सूक्ष्मज्ञानं नास्ति। स: मनुष्यस्य कृते नाटकस्य एष: अंश: कठिन: अभवत्। मलयवत्या वीणावादनस्य उत्तमप्रस्तुति: नाटके सङ्गीतस्य पराकष्ठाया: परियाचिका अस्ति।

**नागानन्दनाटकस्य चतुर्थोऽङ्के यदा गरुड: नायकं अपहरति।**
**आमोदानन्दितालिर्निपतति किमियं पुष्पवृष्टिर्नभर्स्त:?**
**स्वर्गे किं वैष चक्रं मुखरयति दिशा दुन्दुभीनां निनार्दे?**

सुगन्धेन भ्रमरान् आनन्दिता: पुष्पवृष्टि: आकाशात् किमर्थ पतति? वा एष: दुन्दुभीनां ध्वनि: दिक्मण्डलं किमर्थ मुखरं करोति। दुन्दुभीनां ध्वनि: य: हृदयं प्रसन्नं करोति। नागानन्दनाटके वाद्ययन्त्राणां उल्लेखेन ज्ञायते यत् अस्य नाटकस्य रचनायां कवि: ललितकलायां कियत् समर्पितमासीत्।

3. **चित्रकला –** ललितकलायां चित्रकलाया: अद्वितीयं स्थानमस्ति। चित्रं निर्जीवत्वेऽपि सजीवकार्य करोति। कस्यचित् मनुष्यस्य छायाचित्रं परोक्षरूपेण तस्य उपस्थिते: आभासं कारयति मन: च आह्लादयति। चित्रकला मनुष्यस्य कल्पनाशक्तिं स्थापयति। यत: तस्य अन्थ:करणस्य अभिव्यक्ति: चित्ररूपेण प्रदर्शितं भूत्वा सर्वान् प्रसन्नं करोति। नागानन्दनाटके नायकेन नायिकाया: चित्रनिर्माणस्य कृते पञ्चानां वर्णानां शिला विदूषक: आनयति। येषां साहाय्येन नायक: मलयवत्या: अभावेऽपि सम्यक् चित्रं निर्माणं करोति।

**अक्लिष्ट बिम्बशोभाधरस्य नयनोत्सवस्य इव।**
**दयितामुखस्य सुखयति रेखाऽपि प्रथमेदृष्टेयम्॥**

नायकस्य मनसि स्थितभावरूपं मलयवत्या: छायाचित्रं शिलाया: साहाय्येन शीलायां प्रदर्शितं कृतवान् यत् दृष्ट्वा विदूषक कथयति। यस्य जनस्य प्रतिकृति: अलिख्यते स पुरतो न विद्यते तथापि तस्य एवं सुन्दरं विरच्यते इति महदाश्चर्यम्। नायक: वदति– मित्रम्

**प्रिया सन्निहितैवेयं सङ्कल्पस्थापिता पुर:।**
**दृष्ट्वा दृष्ट्वा लिखाम्येनां यदि तत् कोऽत्र विस्मय:॥**

तस्या: विषये नित्यं चिन्तयित्वा मम प्रिया मम पुरत: एव अस्ति। यदि अहं तां पश्यन् चित्रं करोमि तर्हि अस्मिन् किं आश्चर्यम्

रत्नालवी नाटिकायां सागरिका द्वारा निर्मितं चित्रं दृष्ट्वा सुसंगता सागरिकाया: प्रसंसां करोति – **अहो ते निपुणत्वम्। किं शून्यमिवैतच्चित्रं प्रतिभाति। तदहमप्यालिख्य रतिसनाथं करिष्यामि।**

अर्थात् धन्यं ते निपुणता। तथापि एतत् चित्रं शून्यमिव दृश्यते। अत: अहमपि चित्रयित्वा अनुरागयुक्तं करिष्यामि। उदयन: यदा सागरिका द्वारा निर्मितं चित्रं दृष्ट्वा आश्चर्यचकित: अभवत्।

**लीलावधूतपदमा कथयन्ती पक्षपातमधिकं न:।**
**मानसमुपेति केयं चित्रगता राजहंसीव॥**

अर्थात् कोऽयं राजहंसीव अस्माकं मनसि प्रविशति?
लीलापूर्वकं पद्मानि कम्पयन्, अस्माकं कृते अतीव अनुकूला इति स्वलक्षणेन आत्मानं दर्शयति।

4. **नृत्यकला –** नृत्यकला मनुष्यं आह्लादयति। यस्या: आनन्दे मनुष्य: नृत्यं निवारयितुं न शक्नोति। आनन्देन नृत्यं कर्तु आरभते।

**निष्यन्दश्चन्दनानां शिशिरयति लतामण्डपे कुम्मान्ता–**
**नाराद् धारागृहाणां ध्वनियनु तनुते ताण्डवं नीलकण्ठ:।**
**यन्त्रोन्मुक्तश्च वेगाच्चलित विटपिनां पूरयन्नालवाला–**
**वापीतोत्पीडहेलाहृतकुसुमरज: पिञ्जरोऽयं जलौध:॥**

नागानन्दनाटकस्य तृतीयेऽके नृत्यकला वर्णिता अस्ति। जलयन्त्राणां आपताभ्यां शब्द: निर्गच्छति। आपताभ्यां नि:सृतं शब्दं श्रुत्वा मेघगर्जनस्य भ्रमात् मयूर: नृत्यति। सहचरै सह भङ्गानां गीतं सम्पूर्ण लतामण्डलं आनन्दयति। अयं आनन्द: अन्यत्र न लभ्यते, य: अस्मिन् लतामण्डले अनुभूयते। यत्र नृत्यसङ्गीतयो: अद्वितीय: संग्रह: अस्मिन् स्थाने उभयो: आनन्ददायकोऽस्ति।

**निष्कर्ष: –** इत्थं संस्कृतनाट्यपरम्परायां कालिदासस्य पश्चात् यस्य कवे: नाम नयति स: महाकविर्हर्षवर्धन: अस्ति। य: शासनकार्यस्य अत्यन्त व्यस्त: सन् अपि स्वसाहित्यप्रतिभाया: प्रदर्शितवान्। तेन माध्यमेन च सहृदयानां हृदयान् चमत्कृतवान्। संस्कृतसाहित्ये न केवलं नाट्यपरम्पराया: अपितु नाटकीयकाव्यगुणानां च कारणात् संस्कृतसाहित्ये अद्वितीयमस्ति। महाकविर्हर्षवर्धन: स्वरूपकेषु सङ्गीतकलाया:, नृत्यकला:, वादनकलाया: चित्रकलाया: च सृजनं कृत्वा अधिकं रोचकं कृतवान् अस्ति।

**सन्दर्भ ग्रन्थ सूची :–**

1. नागानन्द नाटकम्, पण्डित रामनाथ त्रिपाठी, चौखम्बा कृष्णदास अकादमी, वाराणसी।
2. रत्नावली नाटिकका, डॉ. बालगोविन्द झा, चौखम्बा कृष्णदास अकादमी, वाराणसी।
3. प्रियदर्शिका नाटिका,पण्डित रामनाथ त्रिपाठी, चौखम्बा अमरभारती प्रकाशन, वाराणसी।

**************